तृतीयः पाठः

अभिलाषः

CR9CHH

दयामय! देव! दीनेषु दयादृष्टिः सदा देया ।

प्रतिज्ञा दीनरक्षाया दयालो! जातु नो हेया ।।

मनुष्या मानवा भूत्वा इदानीं दानवा जाताः ।

तदेषा मूढता देशाद् द्रुतं दूरे त्वया नेया ।।

त्वदुपदेशामृतं त्यक्त्वा विपन्नो हन्त लोकोऽयम् ।

तदुद्धाराय चैतेषां प्रभो! गीता पुनर्गेया ।।

किमधिकं ब्रूमहे भगवन्! विनीतप्रार्थनैकेयम् ।

यदेते बालकाः स्वीयाः प्रभो नो विस्मृतिं नेयाः।।

शब्दार्थः

दयादृष्टिः = कृपापूर्ण भाव। **देया** = देना चाहिए। **जातु** = कदाचित् (कभी)। **नो** = नहीं। **हेया** = छोडें़। **जाताः** = हो गये हैं। **इदानीं** = इस समय। **मूढता** = अज्ञानता। **द्रुतम्** = शीघ्र। **नेया** = ले जानी चाहिए। **त्वदुपदेशामृतम्** = तुम्हारे उपदेशरूपी अमृत को। **त्यक्त्वा**

= छोड़कर। **विपन्नः** = दुःखी। **हन्त** = खेद है। **ब्रूमहे** = कहें। **गेया** = गायी जानी चाहिए। **स्वीयाः** = अपने। **विनीतप्रार्थनैकेयम्** = (विनीत+प्रार्थना+ एका+इयम्) विनम्र प्रार्थना एक यह।

अभ्यासः

1. उच्चारणं कुरुत पुस्तिकायां च लिखत-

दीनरक्षायाः, त्यक्त्वा, लोकोऽयम्,

पुनर्गेया , विनीतप्रार्थनैकेयम् , तदुद्धाराय

2. एकपदेन उत्तरत -

(क) दीनेषु का देया ? (ख) कस्याः प्रतिज्ञा न हेया ?

(ग) मूढता कस्मात् दूरे नेया ? (घ) मानवानाम् उद्धाराय पुनः का गेया ?

3. पाठात् उचितपदानि चित्वा वाक्यं पूरयत -

(क) दीनरक्षायाः .... नो हेया।

(ख) मूढता देशात् .... नेया।

(ग) उद्धाराय .... पुनः गेया।

(घ) यदेते बालकाः .... नेयाः।

4. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -

यथा-दीनेषु दयादृष्टिः सदा देया। दीनेषु का देया ?

(क) मूढता देशात् दूरे त्वया नेया।

(ख) गीता पुनर्गेया।

5. उदाहरणानुसारं लिखत -

यथा- लोकोऽयम् = लोकः + अयम्

(क) त्वदुपदेशामृतं =

(ख) किमधिकं =

(ग) यदेते =

(घ) चैतेषां =

(ङ.) पुनर्गेया =

6. संस्कृतभाषायाम् अनुवादं कुरुत -

(क) मेरी यह नम्र प्रार्थना है।

(ख) देश से गरीबी दूर करें।

(ग) कल्याण के लिए शिक्षा दें।

(घ) स्वास्थ्य के लिए प्रदूषण दूर करें।

7. उचितकथनानां समक्षम् 'आम्' अनुचितकथनानां समक्षं 'न' इति लिखत -

(क) दीनेषु दयादृष्टिः देया। ....

(ख) दीनरक्षायाः प्रतिज्ञा हेया। ....

(ग) प्रतिदिनं दन्तधावनं कुर्यात्। ....

(घ) सुन्दरं लेखं न लिखेत्। ....

शब्दार्थः

ध्यातव्यम् - धातोः योग्यार्थबोधनाय (चाहिए) 'यत्' प्रत्ययः भवति, यथा-दातुं योग्यम् = देयम् (देना चाहिए)। अस्य त्रिषु लिङ्गेषु रूपाणि भवन्ति। यथा- दा$यत् =देयम् (नपंु0), देया (स्त्री0), देयः (पु0) (देना चाहिए)।

धातुः +प्रत्ययः - रूपम्

दा +यत् = देयम्नी

नी +यत् = नेयम्

हा + यत् = हेयम्

गै +यत् = गेयम्

शिक्षण-सङ्केतः

1. पद्यानां सस्वरवाचनं कारयत।

2. पाठे वर्णितानाम् अभिलाषाणां छात्रैः अभ्यासं कारयत।

मनोरञ्जनाय

मत्कुण-पिपीलिका-संवादः

मत्कुणः उवाच-

कथय भगिनि! किं तव अभिधानम् ? कृत्वा स्वयं श्रमं भोक्तव्यम्

कुत्र तव वास-स्थानम् ? इति मे अस्ति निजं मन्तव्यम्।

कुतः सम्प्रति आगच्छसि ? अतः श्रमे सततं संलग्ना

त्वरितं कुत्र गच्छसि ? नैव कदापि गतिर्मे भग्ना ।।

अङ्गं तव अतिशय-सुकुमारम् त्वं सदैव पर-तल्पे लीनः

वहसि तथापि अहो! गुरु-भारम्। पीत्वा पर-रुधिरं खलु पीनः।

धावन्ती गच्छसि अविरामम् किन्तु इदं न उचित-कर्तव्यम्

कथय कदा कुरुषे विश्रामम् ? न इदं वेद-शास्त्र-मन्तव्यम् ।।

पिपीलिका उवाच-

मम पिपीलिका इति अभिधानम् अतः श्रमं कृत्वा भोक्तव्यम्वि

वरे विद्धि मदीयं स्थानम्। इति भवताऽपि मतं मन्तव्यम्।

अति दूरादिह मम आगमनम् अस्तु, जहीहि, देहि पन्थानम्

दूरे एव पुनर्मम गमनम्।। दूरे मम गन्तव्य-स्थानम् ।।

शब्दार्थः

मत्कुणः = खटमल। **पिपीलिका** = चींटी। **अभिधानम्** = नाम। विवरे = बिल में । **विद्धि** = जानो। **पर-तल्पे** = दूसरे के बिस्तर पर। **जहीहि** = छोड़ो।

विशेषः- मत्कुण-पिपीलिकयोः मध्ये स×जातस्य उपर्युक्तरोचक-संवादस्य स्वाध्यायं कारयत तथा पिपीलिकायाः श्रमशीलतया आत्मनिर्भरतया च प्राप्तसंदेशं छात्रान् श्रावयत।

क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे।

शब्दार्थः

कश्चिद् = कोई। प्रासादम् = राजमहल। अतोषयत् = सन्तुष्ट किया। सत्कृतः = सत्कार किया गया। अभीष्टम् = मनोवाञ्छित, मनचाहा। वरय = वरदान माँगो। स्पृश्यमानाः = छुये गये। भवन्तु = हो जाएँ। तथास्तु = ऐसा ही हो। अन्तर्हितः = अन्तर्धान हो गया। प्रविष्टः = प्रवेश किया हुआ। अस्पृशत् = स्पर्श किया। स्पृष्टानि = छुये हुए। सद्यः = तुरन्त। जातानि = हो गया। नितराम् =पूरी तरह से। अतुष्यत् = सन्तुष्ट हो गया। महती = बहुत बड़ी। पिपासा = पीने की इच्छा। जाता = उत्पन्न हुई। पातुम् = पीने के लिए। उद्यतः = तैयार हुआ। स्पृष्टम् = छुआ हुआ या स्पर्श किया गया। सुवर्णपिण्डम् = सोने का गोला। उक्तम् = कहा गया। मृषा = झूठ। आगता = आयी। समाश्वासयितुम् = आश्वस्त करने के लिए, भरोसा दिलाने के लिए। प्रवृत्तः = लग गया। अङ्के उपवेशयति स्म = गोद में बैठाया। हन्त = अत्यन्त दुःख है। प्रतिमा = मूर्ति। सञ्जाता = हो गयी। व्यलपत् = विलाप किया। निवर्तयतु = लौटा लें, वापस ले लें।

अभ्यासः

1. उच्चारणं कुरुत पुस्तिकायां च लिखत-

कश्चित् स्वस्त्यस्तु मुनिनैवम् इत्युक्त्वा

साधूक्तम् समाश्वासयितुम् शोकेनोच्चैः तत्रैवान्तर्हितः

2. पूर्णवाक्येन उत्तरत -

(क) मायादासः कः आसीत् ?

(ख) मायादासः किं अयाचत ?

(ग) 'अभीष्टं वरं वरय' इति कः कं प्रति अवदत् ?

(घ) 'हन्त! कुमारी सुवर्णप्रतिमा सञ्जाता' इदं वाक्यं कः अवदत् ?

(ङ) किं दुःखस्य कारणम् ?

ध्यातव्यम्

(क) धातोः भूतकालस्य अर्थे क्तप्रत्ययस्य प्रयोगः भवति यथा- कृक्त =कृतम् (किया गया)। पठ्+क्त = पठितम् (पढ़ा गया)। अस्य प्रयोगः क्रियारूपेण विशेषणरूपेण च भवति। अस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

(ख) धातोः तव्यत् प्रत्ययस्य प्रयोगः योग्यार्थबोधनाय (चाहिए) भवति, यथा - कृ+तव्यत् = कत्र्तव्यम्। मन+तव्यत् = मन्तव्यम्। अस्यापि प्रयोगः क्रियारूपेण विशेषणरूपेण च भवति। अस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

3. उदाहरणानुसारं सन्धि-विच्छेदं कुरुत-

सन्धिपदम् सन्धिविच्छेदः पूर्वपदस्य अन्तिमपदस्य द्वयोः योगेन अन्तिमः वर्णः पूर्ववर्णः सन्धियुक्तवर्णः साधूक्तम् साधु$उक्तम् उ उ ऊ

सुन्दराणीमानि ....

चावदत्....................

शोकेनोच्चैः ....

सत्कारेणातोषयत् ....

4. संस्कृतभाषायाम् अनुवादं कुरुत-

(क) उसका नाम केशव था।

(ख) उसके पिता का नाम रामदास था।

(ग) उसकी माता का नाम मायादेवी था।

(घ) एक बार वह बाजार गया।

(ङ) वहाँ वह अपने मित्र से मिला।

5. मञ्जूषातः क्रियापदानि चित्वा वाक्यानि पूरयत-

जाता जातानि अयाचत आनयत् वरय

(क) मुनिः अवदत् अभीष्टं वरम्................।

(ख) सः भूपतिः वरम्..................।

(ग) तेन स्पृष्टानि वस्तूनि सद्यः एव सौवर्णानि ....।

(घ) तेन स्पृष्टा म×जरी सुवर्णमयी ....।

(ङ) मायादासः उद्यानात् जलम्....................।

6. अस्य पाठस्य कथां स्वशब्देषु हिन्दीभाषायां लिखत।

7. चित्रं दृष्ट्वा मञ्जूषातः पदानि च प्रयुज्य वाक्यानि रचयत-

शिक्षकः छात्रः प्रश्नम्

पृच्छति लिखति अभ्यासपुस्तिकायाम्

श्यामपट्टे छात्राः पृच्छन्ति लिखन्ति

.यथा-शिक्षकः श्यामपट्टे लिखति। ......

शिक्षण-सङ्केतः

लोभे आधारिताः अन्याः कथाः बालकान् श्रावयत।

केतकीगन्धमाघ्रातुं स्वयमायान्ति षट्पदाः।